# Sakaradi Shri Sita Sahasranama Stotram

# સકારાદિશ્રીસીતાસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : Sita Sahasranama Stotram 3 Sakaradi

File name : sItAsahasranAmastotram3sakArAdi.itx

Category : devii, sItA, sahasranAma, stotra

Location : doc_devii

Proofread by : Prabhav Tengse, NA

Latest update : August 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 6, 2023

*sanskritdocuments.org*

# સકારાદિશ્રીસીતાસહસ્રનામસ્તોત્રમ્

(શ્રીરુદ્રયામલતન્ત્રોક્તમ્)
સુરાલયે પ્રધાને તુ દેવદેવં મહેશ્વરમ્ ।
દશૈલાધિપસ્યતનયા સઙ્ગે હરસુવાચ હિ ॥ ૧॥

શ્રીદેવ્યુવાચ ।
પરમેશ પરન્ધામ પ્રધાનપુરુષેશ્વર ।
નામ્નાં સહસ્રં સીતાયાઃ વિસ્તરાત્ વદ શઙ્કર ! ॥ ૨॥

શ્રીમહાદેવ ઉવાચ ।
શ‍ૃણુ દેવિ પ્રવક્ષ્યામિ નામમધ્યેસહસ્રકમ્ ।
પરન્ધામપ્રદાવિદ્યા ચતુર્વર્ગફલપ્રદા ॥ ૩॥

ગુહ્યાત્ ગુહ્યતમં દેવિ ! સર્વસિદ્ધ્યેકવન્દિતા ।
અતિગુહ્યતરાવિદ્યા સર્વતન્ત્રેષુ વેદિતા ॥ ૪॥

વિશેષતઃ કલિયુગે મહાસિદ્ધ્યૌઘદાયિની ।
ગોપનીયા પ્રયત્નેન કસ્મૈચિન્નપ્રકાશયેત્ ॥ ૫॥

વિનાધ્યાન-વિનાપૂજા-વિનાહોમ-વિનાજપમ્ ।
વિનાપુષ્પ-વિનાગન્ધં વિનાદાનં વિનામખમ્ ॥ ૬॥

સકૃદુચ્ચરિતાવિદ્યા બ્રહ્મહત્યાં વ્યપોહતિ ।
એતદ્વિજ્ઞાનમાત્રેણ સર્વસિદ્ધીશ્વરોભવેત્ ॥ ૭॥

અપ્રકાશ્યમિદં સત્યં સ્વયોનિરિવ સુવ્રતે ।
રોધિની વિઘ્નસઙ્ઘાનાં મોહિનીપરયોષિતામ્ ॥ ૮॥

સ્તમ્ભિનિ રાજસૈન્યાનાં વાદિની પરવાદિનામ્ ।
કલૌ પાપસમાકીર્ણે પઠનાન્મુક્તકિલ્વિષામ્ ॥ ૯॥

તસ્માત્ત્વં પઠ દેવેશિ ! સ્વર્ગમોક્ષપ્રદાયકમ્ ।

ન્યાસવિધાં પ્રવક્ષ્યામિ શ ૃણુ પર્વતનન્દિની ॥ ૧૦॥

અસ્ય સહસ્રનામસ્ય ઋષિર્બ્રહ્મા પ્રકીર્તિતઃ ।
છન્દોઽનુષ્ટુપ્ પ્રોક્તશ્ચ સીતાદેવી પ્રકીર્તિતા ॥ ૧૧॥

સૌરભં બીજમાખ્યાતં કમલાશક્તિરીરિતા ।
કીલકં પાશબીજેન વિનિયોગસ્તતઃ પરમ્ ॥ ૧૨॥

અથ ધ્યાનં પ્રવક્ષ્યામિ સીતાયાઃ પરમાદ્ભુતમ્ ।
સર્વપાપહરં દિવ્યં સર્વકામફલપ્રદમ્ ॥ ૧૩॥

આયુઃ કીર્તિકરં પુણ્યં સર્વાઘૌઘવિનાશનમ્ ।
જ્ઞાત્વા સમ્યક્વિધાનેન ન્યાસજાલં સમાચરેત્ ॥ ૧૪॥

ૐ અસ્ય શ્રીસીતાસહસ્રનામમન્ત્રસ્ય બ્રહ્માઋષિઃ
અનુષ્ટુપ્ છન્દઃ શ્રીસીતાદેવતાયૈનમઃ ।
હ્રીં હ્રીં ક્લીં બીજાય નમઃ શ્રીશક્તયે નમઃ
આં કીલકાય નમઃ મમસકલાભીષ્ટસિદ્ધ્યર્થે જપે વિનિયોગઃ ।
અથ ધ્યાનમ્ ।
ધ્યાયેજ્જાનકી રમ્યાં મુક્તાહારસુશોભિતામ્ ।
અનન્તરત્નરચિતાં સિંહાસનવિરાજિતામ્ ॥

ઉદ્યત્સૂર્યસહસ્રાભાં દાડિમીકુસુમપ્રભામ્ ।
સુવૃત્તનિવિડોત્તુઙ્ગકુચમણ્ડલરાજિતામ્ ॥

અનર્ઘ્યં મૌક્તિકસ્ફાર હારભારવિરાજિતામ્ ।
નવરત્નપ્રભારાજિ ગ્રૈવેયવરભૂષણામ્ ॥

શ્રુતિભૂષામનોરમ્યાં સુગણ્ડસ્થલભૂષણાન્ ।
નમામિ પરમાં દેવીં રામવામાઙ્ગાં શિવામ્ ॥

ઇતિ ધ્યાત્વા હૃદ્યુપચારૈસ્સમ્પૂજ્ય સ્તોત્રકં પઠેત્ ।

અથ સહસ્રનામસ્તોત્રમ્ ।
ૐ સીતા સીમન્તિની સીમા સન્મન્ત્રફલદાયિની ॥ ૧॥

સત્યા સત્યવતી સામા સાત્વિકી સર્વમઙ્ગલા ।
સત્પ્રભાવા સતીસાધ્વી સત્કલા સકલેષ્ટદા ॥ ૨॥

સમસ્તા સમદા સાન્દ્રા સાન્દ્રનીલસમપ્રભા ।

સૌભાગ્યજનની સેવ્યા સૌમ્યા સુન્દરરૂપિણીમ્ ॥ ૩॥

સમ્ભ્રમા સમ્ભ્રમાતીતા સન્તુષ્ટફલદાયિની ।
સર્વોત્તુઙ્ગકલા સર્વા સર્વેષ્ટા સઙ્ગમપ્રિયા ॥ ૪॥

શાન્તિપ્રિયા શાન્તિમતી સીમન્તમણિભૂષણા ।
સાવિત્રી સન્મુખી સિદ્ધા શારદા ચ સમપ્રભા ॥ ૫॥

સ્વતન્ત્રા સત્યસઙ્કલ્પા સમદૃષ્ટિફલપ્રદા ।
સારઙ્ગસદૃશા શ્યામા સરસા શશિશેખરા ॥ ૬॥

સમાના સામગા શુદ્ધા સમસ્તસુરસમ્મુખી ।
સર્વસમ્પત્પ્રદાત્રી ચ શમદા સિન્ધુસેવિની ॥ ૭॥

સરસીરુહમધ્યસ્થા સરોવરવિહારિણી ।
સરસ્વતી સુવહ્નિશ્રી શ્રીજયા શુભદાયિની ॥ ૮॥

સર્વમાઙ્ગલ્યજનની સાર્વભૌમપ્રદાયિની ।
સામ્રાજ્યકારિણી સામ્રા સામ્રાજ્યફલદાયિની ॥ ૯॥

સત્યવ્રતા સત્યપરા સદ્ભાવા સત્પરાયણા ।
સન્માર્ગકર્ત્રી સમ્માન્યા સમ્માનસુખદાયિની ॥ ૧૦॥

સત્યજ્ઞાનપ્રદાત્રી ચ સુમનારાધ્યપાદુકા ।
સ્વર્ણકાન્તિ સમપ્રખ્યા સ્વર્ણાભરણભૂષિતા ॥ ૧૧॥

સત્સઙ્કલ્પપ્રદા સજ્યા સુખી સૌખ્યવરપ્રદા ।
સંસારસાગરારૂઢા સંસારભયનાશિની ॥ ૧૨॥

સર્વાર્થસાધિની સર્વા શર્વાણી શઙ્કરપ્રિયા ।
શાશ્વતસ્થાનફલદા શાસના શાસનપ્રિયા ॥ ૧૩॥

સમતા સમતાસારા સારસ્વતફલપ્રદા ।
સિઞ્જાનમણિમઞ્જિરા સસ્મિતાઽધરપલ્લવા ॥ ૧૪॥

સર્વસૌન્દર્યનિલયા સર્વસૌભાગ્યશાલિની ।
સઞ્જનાનન્દનિલયા સત્કર્મફલદાયિની ॥ ૧૫॥

સૂક્ષ્મા સૂક્ષ્મગતિસ્સ્તુત્યા સૂક્ષ્મજ્ઞાનપ્રદાયિની ।
સૌદામિની સુધાદેવી સિન્ધુરૂપા ચ સામ્બિકા ॥ ૧૬॥

સિદ્ધિપ્રદા સિદ્ધિબન્ધુ સિદ્ધેશી સિદ્ધસુન્દરી ।
સન્ધ્યેયત્રી સન્ધ્યઞ્જરા સન્ધ્યાતારુણ્યલાલિતા ॥ ૧૭॥

શમદા શાઙ્કરી સેતુ સુકોલા સરસીરુહા ।
સોમેશ્વરી સોમકલા સોમપાનસુસમ્મતા ॥ ૧૮॥

સૌમ્યાનના સૌમ્યરૂપા સોમસ્થા સોમસુન્દરી ।
સૂર્યપ્રભા સૂર્યમુખી સૂર્યજા સૂર્યસુન્દરી ॥ ૧૯॥

સૂર્યકોટિપ્રતીકાશા સૂર્યતેજોમયી સતી ।
સોમકોટિપ્રભા શોભા સોમમણ્ડલવાસિની ॥ ૨૦॥

શતાનન્દા શ્રુતિધરા સુષુમ્ના શોભનપ્રિયા ।
શોભાવતી સુશોભાઢ્યા શોભના સુભગા સુખા ॥ ૨૧॥

શતાક્ષી શમ્બરધ્વંસી સહસ્રાક્ષી સહોદરી ।
સહસ્રશીર્ષા સર્વેશી સહસ્રપદસંયુતા ॥ ૨૨॥

સહસ્રાક્ષી સુવસ્ત્રાઢ્યા સહસ્રભુજવલ્લિકા ।
શુભવસ્ત્રપ્રિયા સુન્દા શત્રુઘ્ની શન્તનુપ્રિયા ॥ ૨૩॥

શતાનના ચ શબરી સહસ્રપદપઙ્કજા ।
શિશુપાવૃક્ષનિલયા શમ્બરારિ સુખપ્રદા ॥ ૨૪॥

શ્રાન્તિહા સન્તતિઃ સત્યા સન્તાનફલદાયિની ।
શ્રીઙ્કારરૂપિણી શ્રદ્ધા શ્રેયદા શ્રમનાશિની ॥ ૨૫॥

શ્રેષ્ઠા શ્રેષ્ઠકરી શ્રેયા શ્રુતિરૂપા શ્રુતિપ્રિયા ।
શ્રેણીપતિ સમારાધ્યા સુષ્ટુઙ્ગાનપ્રિયઙ્કરી ॥ ૨૬॥

સ્થાણુપત્નિ સ્થિતિકરા સ્થિતિસ્થા સ્થિતિવર્દ્ધિનિ ।
શ્રદ્ધાવતી ચ શ્રમદા શ્રદ્ધાભક્તિસમન્વિતા ॥ ૨૭॥

શ્રીવિદ્યા ષોડશી ષોઢા ષોઢાન્યાસફલપ્રદા ।
શુક્લામ્બરપરીધાના શુક્લગન્ધાનુલેપના ॥ ૨૮॥

શુક્લપુષ્પપ્રિયા શુક્લા શુક્લાભરણભૂષિતા ।
સ્વયઞ્જ્યોતિઃ સ્વયઙ્કર્ત્રી સ્વયમાનન્દવિગ્રહા ॥ ૨૯॥

શેષાદિશાયિની શેષા શ્રીધરાર્ચિતપાદુકા ।
સઙ્કર્ષણપ્રિયા સભ્યા સભામણ્ડલવાસિની ॥ ૩૦॥

સર્વેન્દ્રિયા-સર્વગતિઃ-સર્વસાક્ષી-સમુન્નતા ।
સઙ્ગ્રામકારિણી-શૈવા-સરયૂતીરવાસિની ॥ ૩૧॥

સદ્બ્રાહ્મણકુલોત્પન્ના-સચ્ચિદાનન્દરૂપિણી ।
સુગમા-સુગમપ્રીતા-સુગમધ્યાનતત્પરા ॥ ૩૨॥

સોમપાનરતા-સોમા-શામ્ભવી-શમ્ભુવલ્લભા ।
સમય-સમયાચારા-સંવિજ્ઞાનપરાયણા ॥ ૩૩॥

સનાતનપ્રિયા-શૂરા-શૂરશ્રેણીવિરાજિતા ।
શ્રુતિસ્મૃતિપ્રદાત્રીચ-શ્રાવણી-શ્રાવણપ્રિયા ॥ ૩૪॥

શતપત્રપ્રિયા-સ્વૈરા-સામન્તકુસુમાર્ચિતા ।
સુબોધા-સુમતિઃ સ્વેચ્છા-સુરેશવરદાયિની ॥ ૩૫॥

સઙ્ગીતગાનરસિકા સદાસ્વરવિરાજિતા ।
સરિગમજ્ઞાનફલદા સદાસન્તોષકારિણી ॥ ૩૬॥

સામવેદકૃતોત્સઙ્ગા-સામગાનપ્રિયઙ્કરી ।
શ્રીવૈષ્ણવસમારાધ્યા સ્વેચ્છાવિભવદાયિની ॥ ૩૭॥

સ્વચ્છન્દાચારનિલયા-સ્વેષ્ટા -સ્વેષ્ટફલપ્રદા ।
સ્વચ્છન્દા-સાનુરૂપસ્થા-સામ્યાધિકવરપ્રદા ॥ ૩૮॥

શાકમ્ભરી-શિવારાધ્યા સિંહાચલનિવાસિની ।
શિવઙ્કરી -શિવાઙ્કસ્થા-શિવધ્યાનપરાયણા ॥ ૩૯॥

સમ્પાદનપ્રિયા સભ્યા-સમ્પૂર્ણફલદાયિની ।
શઙ્ખપત્રાશિની શઙ્ખસ્વના-શઙ્ખગલાશશી ॥ ૪૦॥

શઙ્ખિની-શઙ્ખવલયા-શઙ્ખમાલાવતી-સમી ।
શમ્બરી શામ્બરી શમ્બૂ-શમ્બુકી-શબરાશિની ॥ ૪૧॥

શઙ્ખી-શઙ્ખવતી-શઙ્ખા-શ્યામાઙ્ગી-શ્યામલોચના ।
શ્મશાનસ્થા -શ્મશાના ચ શ્મસાનસ્થલભૂષણા ॥ ૪૨॥

શિવદાઽશિવહન્ત્રી ચ શકુની -શઙ્ખશેખરા ।
સુમુખી-શોષિણી-શોષી-સૌરી સૌર્યા સરાસરી ॥ ૪૩॥

શમ્પહા શાપહા શમ્પા સમ્પત્ -સમ્પત્તિદાયિની ।

શ઼ૃઙ્ગિણી -શ઼ૃઙ્ગીફલભુક્ શાન્તિની-શઙ્કરપ્રિયા ॥ ૪૪॥

શઙ્કા-શઙ્કાપહાસંસ્થા શાશ્વતા શીતલા-શિવા ।
શિવસ્થા -શિવભુક્ શાલી -શિવાકરા શિવોદરી ॥ ૪૫॥

શાયિની શયની-શિંસા શિશુપા -શિશુપાયિની ।
શવકુણ્ડલિની શ્વેતા શીકરી-શશિલોચના ॥ ૪૬॥

શિવકાઞ્ચી -શિવશ્રીકા શિવમાલા શિવાકૃતિ ।
સમ્પાતિઃ શઙ્કુવસતિઃ શન્તનુઃ શીલદાયિની ॥ ૪૭॥

સિન્ધુઃ સ્વૈરગતઃ સૈન્ધ્રી સુન્દરી સુન્દરાનના ।
સાધુઃ સિધ્દ્ધા સિદ્ધિદાત્રી સિધ્દ્ધાસિધ્દ્ધસ્વરૂપિણી ॥ ૪૮॥

સરઃ સમા સમાના ચ સમારાધ્યા સમસ્તદા ।
સમૃધ્દ્ધા સમદા સસ્પ્રા સમ્મોહારૂપદર્શના ॥ ૪૯॥

સમિતિઃ સમિધા સ્નેહા સુધારસસમન્વિતા ।
સમીરા સન્તતા સમા સાધ્વી સાધુસહાયિની ॥ ૫૦॥

શાદ્વલી સઙ્કૃતિઃ શાઢ્યા સમ્પ્રદાયપ્રસાદિની ।
સુવના સુમનાચારા સમાના સામસી શુભા ॥ ૫૧॥

શ્રીમતાં શ્રીમતી શ્રીમા શ્રીશા શ્રીપદ્મવાસિની ।
સાલઙ્કૃતા શાલુવેશી શાલુવેશપ્રિયઙ્કરી ॥ ૫૨॥

સુલભા સુલભારાધ્યા સુશ્રાવા સુષ્ઠુમલ્લિકા ।
શુચિજ્ઞા સુમના શુધ્દ્ધા શુચિધ્યાનસમાશ્રિતા ॥ ૫૩॥

શુચિકર્મપરા શુત્રી શુચિની સૂચનપ્રિયા ।
સુજ્ઞાનનિલયા સુજ્ઞા સુબુદ્ધિ સન્નિવેશના ॥ ૫૪॥

સત્કાલગામિની સ્પર્શા શિવમૌલિકૃતાશ્રયા ।
સ્તુત્યર્થા સર્વદોષઘ્ની સમ્પક્વફલદાયિની ॥ ૫૫॥

સંસર્ગા સંસ્પૃશા સ્તુત્યા સ્તોકસ્તોત્રપ્રિયઙ્કરી ।
સદા સર્વદાસ્તુત્યા સુધિયા સર્વદેવતા ॥ ૫૬॥

સુરાલયા સુષ્ઠુરતા સુપર્ણા સુમનાર્ચિતા ।
સદ્બોધનિરતા સસ્યા સવ્યપાણિઃ સુરદ્યુતિઃ ॥ ૫૭॥

સાઙ્ખ્યયનમુનિસ્તુત્યા સઙ્ખ્યાસાહિત્યદાયિની ।
શાલ્મલીકુસુમપ્રખ્યા શોણ્ડીમેમાર્જનીકર ॥ ૫૮॥

સ્કન્દપુત્રી સ્કન્દમાતા સ્કન્દા સ્કન્દવરપ્રદા ।
સ્ફુટાર્થફલદા સ્ફોટા સ્ફુટવક્ત્રા સ્ફુટપ્રિયા ॥ ૫૯॥

સંસારપઙ્કનિર્મગ્નસમુદ્ધરણપણ્ડિતા ।
સાનિધ્યદાયિની સન્ધિઃ સુદશા સુમનોહરા ॥ ૬૦॥

સમ્યકસમુચ્ચરી સસ્યા સ્વર્ભાનુઃફલદાયિની ।
શસકા સસ્મિતા સસ્મા સુમેરૂ શુચિભૂષણા ॥ ૬૧॥

શુચિસ્મિતા સુનેત્રા ચ સુકોમલા સુલક્ષણા ।
શુણ્ડપ્રિયા શુણ્ડમાતા શુણ્ડાદણ્ડવિરાજિતા ॥ ૬૨॥

સઞ્ચિતા સઞ્ચરી સૈવા સત્યાભૂપાલસેવિતા ।
સુમેખલા સુગુપ્તા ચ સ-ગિરા ચ સુવિસ્તરા ॥ ૬૩॥

સકુન્તલાચ સદ્ગુણ્યા શઠદર્પાપહારિણી ।
સ્મરપત્નીસમારાધ્યા સ્મરારિ સુખદાયિની ॥ ૬૪॥

સમ્પૂજ્યદેવતારૂપા સનકાદિમુનિસ્તુતા ।
સ્વભાવચઞ્ચલાપાઙ્ગી સનન્દનવરપ્રદા ॥ ૬૫॥

સાષ્ટાઙ્ગનમનપ્રીતા સમ્મીલનપરાયણા ।
શાન્તોદરી સ્વયન્ધામા શરણાગતવત્સલા ॥ ૬૬॥

શોભાવતી શુભાકારા શઙ્કરીર્ધશારિણી ।
શ્રોણા શુભ્રજલા સુશ્રૂ શરસન્ધાનકારિણી ॥ ૬૭॥

શરાવતી શરાનન્દા શરજ્જ્યોત્સ્ના શુભાનના ।
શલભા શૂલિની શ્રોતા સુનમ્રા શુક્લવાહના ॥ ૬૮॥

સુભ્રૂર્વારિષ્યૈવા ષડ્તુશ્ચ ષડાનના ।
ષડાધારસ્થિતા શસ્ના ષડઞ્જા ષણ્મુખપ્રિયા ॥ ૬૯॥

સન્યાસધારિણી સૈન્યા સુધન્યા સુષ્ઠુગોચરા ।
ષડઙ્ગરૂપસુરતા સુરાસુરનમસ્કૃતા ॥ ૭૦॥

સર્વવાસા સદોન્મત્તા સુસ્તની સાગરામ્બરા ।
સુવ્યવસ્થા ચ સુરભિઃ સૂર્યમણ્ડલમધ્યગા ॥ ૭૧॥

સત્યાર્થનિલયા સત્યા સત્યજિહ્વાગ્રવાસિની ।
સહસ્રદ્વયજિહ્વાગ્રશેષપર્ય્યઙ્કશાયિની ॥ ૭૨॥

સત્યાર્ચિમણ્ડલગતા સવ્યા સૂર્યવિભૂષણા ।
સારિકા શ્યામલા સ્મેરા સ્મેરવક્ત્રા શુકપ્રિયા ॥ ૭૩॥

શુકાધ્યયનસમ્પન્ના શુકી શુકવરપ્રિયા ।
શુક્રાચાર્યપ્રિયાઽશોકા શોકસન્તાપહારિણી ॥ ૭૪॥

સ્વર્ગમોક્ષસુખદ્વારા સર્વકામસુખપ્રદા ।
સપ્તદ્વીપાત્મકાધારા સપ્તસાગરધારિણી ॥ ૭૫॥

સર્વપર્વા ચ પર્વાગ્રા સપ્તર્ષિ સુરસેવિતા ।
સદ્યોજીવા સર્વસન્ધ્યા સર્વલોકસમાશ્રયા ॥ ૭૬॥

સુધાવક્ત્રા સૌમનસ્યા સમ્ભૂતા સુકૃતાલયા ।
સર્વા સર્વજગત્પૂજ્યા સર્વદ્વન્દવિનાશિની ॥ ૭૭॥

સંસારપાશવિછિન્ના સર્વમન્ત્રમયી સુરા ।
સુધાસમ્પૃષ્ટસર્વાઙ્ગી સુધાપઙ્કજમાલિની ॥ ૭૮॥

સૂર્યાઙ્ગુલી સુનક્ષત્રા સૌરીકેશીસ્વલઙ્કૃતા ।
સર્વદેવસમુત્પન્ના સર્વદેવમયીશ્વરી ॥ ૭૯॥

સૂર્યજાલાંશુમધ્યસ્થા સઙ્ક્રમા સઙ્ક્રમપ્રિયા ।
સર્વપૌરુષવલ્લી ચ સર્વધર્માધિકારિણી ॥ ૮૦॥

સપ્તકોટીશ્વરીવિદ્યા સંસારાર્ણવતારિણી ।
શ્રીકણ્ઠા શિતિકણ્ઠા ચ સુધાધારામ્બુવર્ષિણી ॥ ૮૧॥

સમુત્તીર્ણા શક્તિરૂપા સુશક્તિશ્ચ સુધાવતી ।
સકલાખ્યાનસન્તુષ્ટા સોમસૂર્યાગ્નિમધ્યગા ॥ ૮૨॥

સૂક્ષ્મસૂત્રા સૂક્ષ્મરૂપા સૂસૂત્રા સૂત્રરૂપિણી ।
સહસ્રાદિત્યસઙ્કાશા સહસ્રનયનોજ્જ્વલા ॥ ૮૩॥

સહસ્રમૂલા સહસ્રેશી સર્વવિઘ્નવિનાશિની ।
સર્વવાદિત્રહસ્તા ચ સર્વપ્રહરણોદ્યતા ॥ ૮૪॥

સુરભી સૌરભેયી ચ સુધાધારા સુધાવહા ।

સર્વબન્ધનસઙ્ક્ષેત્રી સર્વાભિચારનાશિની ॥ ૮૫॥

સર્વસિદ્ધિમહામાયા સર્વાર્થકસાધિકા ।
સર્વસઙ્ગ્રામજનની સર્વશત્રુવિનાશિની ॥ ૮૬॥

સર્વૈશ્વર્યસમુત્પત્તિઃ સર્વલોકૈકદીપિકા ।
સર્વલોકસુખોત્પન્ના સર્વતઃસુખદાયિની ॥ ૮૭॥

સર્વદુઃખાન્તકરણી સુભદ્રા સર્વસાત્વિકા ।
સહસ્રશાખાફલિની સર્વરોગનિષૂદિની ॥ ૮૮॥

શત્રુદ્વેષ્ટી શત્રુહન્ત્રી શત્રુનામનિકન્દિની ।
સકલંહાસ્વરૂપસ્થા સોઽહં-શબ્દસ્વરૂપિણી ॥ ૮૯॥

શ્રીમન્ત્રરાજસદૃશા શ્રીશૈલપદગામિની ।
શ્રીચક્રરાજનિલયા શ્રીમત્રિપુરસુન્દરી ॥ ૯૦॥

સુવાસિન્યર્ચનપ્રીતા સુકુમારપ્રિયઙ્કરી ।
સદોન્મત્તા સદાતુષ્ટા શર્મદા શમ્ભુગેહિની ॥ ૯૧॥

સ્વસ્થા સ્વભાવમધુરા સદાશિવકુટુમ્બિની ।
સવ્યાપસવ્યમાર્ગસ્થા સવ્યસાત્રી સહાયિની ॥ ૯૨॥

સુદક્ષિણા સુકૌમારી સુમેના ચ સુરમ્ભિકા ।
સર્વોપનિષદસ્તુત્યા સમીરતનયસ્તુતા ॥ ૯૩॥

સત્યજ્ઞાનાનન્દરૂપા સામરસ્યપરાયણા ।
સર્વોપાધિવિનિર્મુક્તા સદાશિવપતિવ્રતા ॥ ૯૪॥

સર્વતન્ત્રેશ્વરી શક્તિ સર્વગા સર્વમોહિની ।
સર્વાધારા સુપ્રતિષ્ઠા સદસદ્રૂપધારિણી ॥ ૯૫॥

સર્વવેદાન્તસંવેદ્યા સત્યાનન્દસ્વરૂપિણી ।
શુભાચારા સમાવાણી સવીદક્ષિણવિરાજિતા ॥ ૯૬॥

સર્વાદનેપ્રીતચિત્તા સિન્દૂરતિલકાઙ્કિતા ।
સહસ્રદલમધ્યસ્થા સર્વવર્ણોપશોભિતા ॥ ૯૭॥

સર્વાયુધધરા શુક્રા સંસ્થિતા સર્વતોમુખી ।
સ્વાહા સ્વધા સહસ્રારા સર્વમૃત્યુનિવારિણી ॥ ૯૮॥

સશ્વાદ્યાયુધસમ્પન્ના સ્વાધિષ્ટામ્બુજસંસ્થિતા ।
સમસ્તભક્તસુખદા શાકિન્યેવાસ્વરૂપિણી ॥ ૯૯ ॥

શિવદૂતી શિવારાધ્યા શિષ્ટેષ્ટા શિષ્ટપૂજિતા ।
સંહૃતાશેષપાખણ્ડા સદાચારપ્રવર્તિની ॥ ૧૦૦ ॥

સ્વાત્માનન્દલયીસૂક્ષ્મા શુભાહ્લાદનચન્દ્રિકા ।
સદ્યઃપ્રસાદિની સાક્ષી સાક્ષિણી સાક્ષિવર્જિતા ॥ ૧૦૧ ॥

ષડઙ્ગદેવતાયુક્તા ષાડ્ગુણ્યયરિપૂજિતા ।
શ્રુતિસીમન્તસિન્દૂરી સદાશિવગૃહસ્થિતા ॥ ૧૦૨ ॥

સકલાગમસન્દોહા શુક્તિસમ્પુટમૌક્તિકા ।
સહસ્રવદનપ્રીતા સર્વશ્રમનિવારિણી ॥ ૧૦૩ ॥

સત્યપ્રાજ્ઞાપિકા સત્યા સર્વાવસ્થાવિવર્જિતા ।
સંહારિણી સૃષ્ટિરૂપા સૃષ્ટિકર્ત્રી શિવાલયા ॥ ૧૦૪ ॥

સકલ-હ્રીં-બીજરૂપાત્મા સૌંબીજનિલયાત્મિકા ।
સહૌં-બીજસુસર્વાઙ્ગી સમ્મોહનઋષિપ્રિયા ॥ ૧૦૫ ॥

સફલ-હ્રીં-મહાવિદ્યા શુક્રાચાર્યહૃદિસ્થિતા ।
સાક્ષમૌલૈકબીજસ્થા સચ્છૂદ્રસમુપાશ્રિતા ॥ ૧૦૬ ॥

સદસદ્રામનિલયા શતરુદ્રાશતાનના ।
શ્રીરામહૃદયાનન્દદશધાનનવિઘાતિની ॥ ૧૦૭ ॥

ખ્યૌં-બીજા શ્રીં-બીજા શ્રીંશ્રીંશ્રીંહ્રીનિકેતના ।
સ્વરન્યાસસ્વરૂપસ્થા શુક્રાન્તા શુક્રતર્પણા ॥ ૧૦૮ ॥

સુકર્પૂરનિભાસાત્મા શુભસ્થલનિવાસિની ।
સન્ધ્યાગ્રરૂપિણી સન્ધ્યા સંહિતા સંહિતાત્મના ॥ ૧૦૯ ॥

સૃન્નાસમેદોસ્થિગતા સુકુક્ષા સુહૃદિસ્થિતા ।
ફિંસુલો ચ ભાસૌફાસક્રૌં સમદલાત્મિકા ॥ ૧૧૦ ॥

સક્રીં-હંસસ્વરૂપસ્થા સ-ક્લૌંવિહગરૂપિણી ।
સુવર્ણીવર્ણસર્વાઙ્ગી સ્ત્રીરૂપા શાસ્ત્રશાલિની ॥ ૧૧૧ ॥

સક્રમાન્યાસવેણી ચ સ્વામિની શિવપોષિણી ।
શ્વેતાતપત્રધરિણી સિદ્ધાર્થી શીલભૂષણા ॥ ૧૧૨ ॥

સત્યાર્થિની સન્ધ્યાભા ચ શચી સિંહી સહઙ્કરી ।
સઙ્કોચાર્થપ્રદર્શી ચ સુહૃદબન્ધુવિહારિણી ॥ ૧૧૩॥

શિપિવિષ્ટપ્રિયાશ્વોકા સુકામા સજ્જનાશ્રયા ।
સૂક્ષ્મેલવરઘુરુષાં સ્થારલૌરૂપધારિણી ॥ ૧૧૪॥

શિવશક્તિસમાશ્લિષ્ટા સ્ફુરદ્વ્યોમાન્તરસ્થિતા ।
સર્વરોગહરાખ્યા ચ સૌરભાચૌરસંસ્તુતા ॥ ૧૧૫॥

સમ્પુટબ્રહ્મમધ્યસ્થા સર્વસમ્પુટમાલિકા ।
સર્વાશાપૂરણીશ્લાઘ્યા શ્લીંબીજા શ્લીમ્પરાશિલા ॥ ૧૧૬॥

શિલાસ્વરૂપતરણીં શુક્લાઙ્ગી શુક્લભાષિણી ।
સદા શૃઙ્ગનિવાસી ચ સાવર્ણીતનયસ્તુતા ॥ ૧૧૭॥

સુરથ્યા સુરથારૂઢા સુરથજ્ઞાનદાયિની ।
સ્ત્રૌમ્બીજવાસિની શ્રાન્તા શ્રાન્તસન્તાપહારિણી ॥ ૧૧૮॥

શ્મશાનકાલી સાગુહ્યા શ્મશાનાગારભૂષણા ।
શાક્તપ્રિયા શક્તિકલા શાક્તા શક્તિપરાયણા ॥ ૧૧૯॥

સખીવૃન્દનિવાસા ચ સખિગોષ્ઠીપ્રિયઙ્કરી ।
શુભભોગાઘસન્તુષ્ટા સર્વજ્ઞાનાક્ષમાલિની ॥ ૧૨૦॥

શ્વેતદ્વીપનિવાસા ચ શુભ્રજામ્બૂનદસ્થિતા ।
સમશ્લેષાતુરાત્મા ચ સવિદ્યુત્તેજરૂપિણી ॥ ૧૨૧॥

સાકારનિલયા સાકા સાકેતપુરવાસિની ।
સપ્તવ્યાહૃતિસંયુક્તા સ્નુષા સુવ્યક્તમાલિકા ॥ ૧૨૨॥

સામ્બાલયા સામ્બરૂપા સુનાગમણિભૂષણા ।
સુજટા સૌકલા સૌખ્યા સર્પમાલવિભૂષણા ॥ ૧૨૩॥

સંહારભૈરવસ્તુત્યા સ્માર્તહોમપ્રિયઙ્કરી ।
સર્વપ્રિયા સમૃદ્ધા સા સદ્વૈદ્યભિષજપ્રિયા ॥ ૧૨૪॥

સૌરાષ્ટ્રદેશમધ્યસ્થા સોમનાથેશ્વરાઙ્ગા ।
સ્વયંવરોત્સવપ્રીતા સૌમિત્રિપ્રિયભાષિણી ॥ ૧૨૫॥

શક્તિસઙ્ગમસન્તુષ્ટા શરત્તારાઙ્ગણસ્થિતા ।

સપ્તાશ્વરથસંસ્થા ચ શ્વેતકુઞ્જરવાહિની ॥ ૧૨૬॥

શ્રીમદ્ભગવતી શ્વાસા સુકુમારી સુકન્યકા ।
શ્રીસાગાનન્દદમના શ્રીમજ્જનકનન્દિની ॥ ૧૨૭॥

સદાદ્વૈતસ્વરુપા ચ સુકર્ણા ચ સુકુણ્ડલા ।
સમ્ભાષકારિણીં શ્વાસા ચાતુરી શાન્તરોહિણી ॥ ૧૨૮॥

સૈરાવતી સરોન્માદા સરાવણનિકન્દિની ।
સહસ્રાનનઘાતી ચ સપટ્ટિશકરાયુધા ॥ ૧૨૯॥

સક્રીંકાલીસ્વરૂપસ્થા સ-લ્હીં-ભેદસ્વરૂપિણી ।
સગ્લૌં-પઞ્ચાસ્ત્રરૂપસ્થા સધ્વં-પઞ્ચસ્વરૂપિણી ॥ ૧૩૦॥

સલ્વં-પઞ્ચમુદ્રાધિગતા સચ્છીધ્રશ્ચ મધુવ્રતા ।
સનાતનપ્રેતસંસ્થા સ-પઞ્ચામૃતભક્ષિણી ॥ ૧૩૧॥

સકૌલિકગૃહાન્તસ્થા સવામાં ચ સદક્ષિણા ।
સ-પઞ્ચવાણવ્યથિતા સદાદેવપ્રસાદિનો ॥ ૧૩૨॥

સઘના ચ સુગન્ધા ચ સતડિત્કાન્તિ સન્નિભા ।
સર્વકાલમયીરૂપા સબિમ્બા શીલલઙ્ઘના ॥ ૧૩૩॥

સેન્દ્રાયુધસમુત્કણ્ઠા સુરાચાર્યવરપ્રદા ।
સુગન્ધવલ્લીકાન્તસ્થા સમુધા સાન્દ્રમાલિકા ॥ ૧૩૪॥

સત્યજ્યોતિસ્વરૂપસ્થા સજુહોમિતભાષિણી ।
શુનિસેફઃ ઋષિસ્તુત્યા શ્વેતવર્ણા સમુજ્જ્વલા ॥ ૧૩૫॥

શ્રીકૃષ્ણાઙ્કનિવાસિની શુભગા શુભમઙ્ગલા ।
સ્નાનોદકપ્રિયા સ્નાતા સમુદ્રા સિન્ધુવાસિની ॥ ૧૩૬॥

સચ્છિષ્યબોધિની શિષ્યા શતજન્મા શતાકૃતિઃ ।
સદ્ધનાશ્રિતપાદાબ્જા સદાનન્દવિહારિણી ॥ ૧૩૭॥

સર્વતીર્થાઽવગાહિની સંશોભનસચ્ચકુકા ।
શ્રીં હ્રીં ક્રીં ભૈરવીસાધ્યા શ્રીં ક્રીં હ્રીં હૂં સમન્વિતા ॥ ૧૩૮॥

શબ્દબ્રહ્મસમુત્પન્ના શઙ્કરોત્પત્તિકારિણી ।
શત્રુનાશા શત્રુદાતા શત્રુનાશનતત્પરા ॥ ૧૩૯॥

શ્રીં હ્રીં સ્ત્રી શુક્લભૈરવી શું શું શક્તિસ્વરૂપિણી ।
શાલાક્ષી શાલરૂપા ચ શાલપાનપરાયણા ॥ ૧૪૦॥

શૂં શૂં શૂંગતિસ્વરૂપિણી સકારાક્ષરભૂષિતા ।
શીઘ્રરૂપા ચ શીઘ્રા ચ શીઘ્રતત્ત્વવિમોહિની ॥ ૧૪૧॥

શૂકરસ્થાઃ શૂકરેજ્યા શૂકરાકૃતિલાલના ।
શત્રોરશનસન્તુષ્ટા શૈલસ્નેહપ્રિયઙ્કરી ॥ ૧૪૨॥

શમીપૂજારતપ્રીતા શાન્તિસ્તોત્રપરાયણી ।
શવવાહનસન્તુષ્ટા શવરૂપા શવેશ્વરી ॥ ૧૪૩॥

શ્રીમદ્રૂપા ચ સદ્બાલા શેષચણ્ડપરાયણા ।
શ્રીગુણા શ્રીશરન્માયા શારદાનન્દકારિણી ॥ ૧૪૪॥

શ્રીપાર્વતિ શક્તિમેધા શ્રીકમલા ચ સુગર્ભિણી ।
શીતોષ્મસમદુઃખઘ્ની શિવમુદ્રાપ્રદર્શિની ॥ ૧૪૫॥

સુકાલી સુતારા ચ સુછિન્ના ચ સુસુન્દરી ।
શ્રીમદ્ભુવનેશ્વરી ચ શ્રી શ્રીમાયા ચ સુસિદ્ધિદા ॥ ૧૪૬॥

શ્રીબગલા શ્રીધૂમા શ્રીમહાલક્ષ્મી ચ શાલિકા ।
સ્વકીયાર્ચનસન્તુષ્ટી શિવાબલિપ્રિયાત્મિકા ॥ ૧૪૭॥

સુરમ્યા ચિત્રકૂટસ્થા સુદર્શનસહાયિની ।
સભયાઽભીષ્ટવરદા સક્રોધા સભયઙ્કરી ॥ ૧૪૮॥

સુગ્રીવાદિહરિસ્તુત્યા સુષ્ટુગ્રીવા સુસાગરા ।
સપ્તપાતાલચરણા સપ્તતાલપ્રભેદિની ॥ ૧૪૯॥

સુરક્તમણિભૂષાઙ્ગી શુમ્ભાસુરનિકૃન્તિની ।
શુદ્ધસ્ફટિકસઙ્કાશા સુતામ્બૂલધરપ્રિયા ॥ ૧૫૦॥

સુસર્વજ્ઞા સર્વશક્તિ સર્વૈશ્વર્યપ્રદાયિની ।
સર્વશ્રીશાઙ્કરી સર્વોન્માદિની ચ મહાઙ્કુશા ॥ ૧૫૧॥

સાં સી સર્વાંશપૂરણી શ્રૈં-શ્રૈં-શ્રૈં-શ્રીચક્રસ્વામિની ।
શાપાનુગ્રહસામર્થ્યા સ્વચક્રાયુધરક્ષિણી ॥ ૧૫૨॥

સગરાત્મજસન્દગ્ધા શુક્રકર્ત્રી ચ સપ્તમી ।
સંવત્સરપ્રિયા ષષ્ઠી સત્યગૃહસ્વરૂપિણી ॥ ૧૫૩॥

સુમસ્ય સરિતસ્નાતા સરિતાનાંશિરોમણિઃ ।
સહજાનન્દલહરી સ્વર્ણાકર્ષણભૈરવી ॥ ૧૫૪॥

સુભોજનપ્રીતિચિત્તા ષડ્રસસ્વાદનપ્રિયા ।
સૌધાત્મિકા સૌધરૂપા સુસૌધા સૈન્ધવપ્રિયા ॥ ૧૫૫॥

શોધના શોધકૃત્ સૌધા શોધનપ્રિયમાનસા ।
સુદૃષ્ટિશ્ચ સુલજ્જા ચ સુભ્રૂનાસા સમૌક્તિકા ॥ ૧૫૬॥

સુબાહુમદદર્પઘ્ની સૂર્યઘ્ની સૂર્યકૃન્તની ।
સર્વપ્રયોગકુશલા સર્વસ્તમ્ભનકારિણી ॥ ૧૫૭॥

સુશ્રૂપાલનસન્તુષ્ટા શુશ્રૂવેષા શુશ્રુપ્રિયા ।
સુદામાદુઃખસંહર્ત્રી સુભદ્રાશોકનાશિની ॥ ૧૫૮॥

શલ્યપ્રતિજ્ઞાપહૃતા સહદેવપ્રિયઙ્કરી ।
શક્તિકલ્યાણદાત્રી ચ શક્તવૈરીવિનાશિની ॥ ૧૫૯॥

શ્રીકૂર્ચબીજસહિતા શશિવિઘ્નવિનાશિની ।
શ્રીં ક્લીં વિઘ્નવિનાશિન્યૈ શમ્ભુભોગપરાયણા ॥ ૧૬૦॥

સમ્પૂર્ણચન્દ્રવદના શોકમાર્ગવિનાશિની ।
શત્રુચ્ચાટનમાર્ગસ્થા શત્રુમોહનકારિણી ॥ ૧૬૧॥

શૃઙ્ગીવાદનસન્તુષ્ટા સારાત્સારતરાસ્મૃતા ।
સારસ્વતમુનિસ્તુલ્યા સાધિતાઽખિલવૈભવા ॥ ૧૬૨॥

સુપુષ્પિતા સુવેલાદ્રિસમીપા સર્વકામિની ।
સર્વભૂતાન્તનિરતા શ્લોકતત્વાર્થદર્શિની ॥ ૧૬૩॥

સઞ્જયપ્રિયકર્ત્રી ચ સુયોધનવધોદ્યતા ।
સર્વભૂતપતિસ્સ્તુત્યા સાત્વિકી સર્વરક્ષિણી ॥ ૧૬૪॥

સામીપ્યફલદાયી ચ સારૂપ્યફલભોગિની ।
સાલોક્યફલસિદ્ધ્યર્થા સાયુજ્યપદદાયિની ॥ ૧૬૫॥

અથ ફલશ્રુતિઃ ।
ઇતિ તે કથિતં દેવિ ! દિવ્યનામસહસ્રકમ્ ।
સીતાદેવ્યાઃ પરં ગુહ્યં મહાપાતકનાશનમ્ ॥ ૧॥

અષ્ટમ્યાં ચ ચતુર્દશ્યાં સઙ્ક્રાન્તૌ મઙ્ગલે દિને ।
અમાયાં ચ તથા રાત્રૌ નવમ્યાં ચ શુભેદિને ॥ ૨॥

પૂજાકાલે વ્યતીપાતે સન્ધ્યયોરુભયોરપિ ।
યઃ પઠેદ્ પાઠયેદ્ વાપિ શ ૃણોતિ શ્રાવયેદપિ ॥ ૩॥

લભતે ગાણપત્યં સઃ યઃ પઠેત્ સાધકોત્તમઃ ।
સર્વપાપવિનિર્મુક્તઃ સયાતિ પરમાઙ્ગતિમ્ ॥ ૪॥

શ્રદ્ધયાઽશ્રદ્ધયા વાપિ યઃ કશ્ચિન્માનવઃ પઠેત્ ।
દુર્ગતિં તરતે ઘોરાં સયાતિ વિષ્ણુમન્દિરમ્ ॥ ૫॥

સવન્ધ્યા વા કાકવન્ધ્યા વા મૃત્વત્સા ચ યાઙ્ગના ।
સ્તુત્વા સ્તોત્રમિદં પુત્રાઁલ્લભતે ચિરજીવિનઃ ॥ ૬॥

યં યં ચિન્તયતે કામી પઠેત્સ્તોત્રમનુત્તમમ્ ।
સીતાવરપ્રસાદેન તં તં પ્રાપ્નોતિ માનવઃ ॥ ૭॥

પઞ્ચોપચારૈ નૈવેદ્યં બલિભિર્બહુશોભિતૈઃ ।
ધૂપદીપૈર્મહાદેવીં પૂજયિત્વા મનોરમે ॥ ૮॥

ષડક્ષરં મહામન્ત્રં યદ્વા લક્ષપઠેત્સુધી ।
અનન્યચેતા સ્થિરધીર્વિશુદ્ધાસનસંસ્થિતઃ ॥ ૯॥

વાયુતુલ્યં વલો લોકે દુર્જયઃ શત્રુમર્દનઃ ।
સર્વવિદ્યાવતાં શ્રેષ્ઠો ધનેન ચ ધનાધિપઃ ॥ ૧૦॥

સર્વસઙ્કટમુત્તીર્ણઃ સર્વસિદ્ધિસમન્વિતઃ ।
શ્રીસીતોત્કૃષ્ટદેવ્યાશ્ચ સેવ્યમાનોસ્મરોપમઃ ॥ ૧૧॥

મહેશવત્ યોગીન્દ્રઃ ભૂતૈઃસહપ્રપૂજિતઃ ।
કામતુલ્યસ્વરૂપોઽસૌ સર્વાકર્ષણકારકઃ ॥ ૧૨॥

સૂર્યેન્દુજલવાયૂનાં સ્તમ્ભકો રાજવલ્લભઃ ।
યશસ્વી સત્કવિર્ધીમાન્ સમન્ત્રી કોકિલસ્વરઃ ॥ ૧૩॥

બહુપુત્રો જગત્સ્વામી નરેશોધાર્મિકઃ સુખીમ્ ।
માર્કણ્ડેય ઇવાયુષ્માન્ જરાપલિતવર્જિતઃ ॥ ૧૪॥

નવયૌવનયુક્તઃ સ્યાદપિવર્ષસહસ્રભાક્ ।
બહુ કિં કથનાત્તસ્ય પઠેત્સ્તવમનુત્તનમ્ ॥ ૧૫॥

ન કિઞ્ચિદ્ દુર્લભં લોકે યદ્યદ્ મનસિ વર્તતે ।
તત્સર્વં સ્વલ્પકાલેન ભવિષ્યતિ વરાનને ॥ ૧૬॥

સુરાપાનં બ્રહ્મહત્યા સ્તેયં ગુર્વઙ્ગનાગમઃ ।
સર્વમાશુતરત્યેવ સ્તવસ્યાસ્યપ્રસાદતઃ ॥ ૧૭॥

સ્તવેનાનેનસંસ્તુત્વા સાધકઃ કિન્નસાધયેત્ ।
મૂલમષ્ટોત્તરં જપ્ત્વા પઠેન્નામસહસ્રકમ્ ॥ ૧૮॥

દર્શનં ચ ભવેદાશુ દેવગન્ધર્વસેવિતઃ ।
યેનકેનપ્રકારેણ સીતાભક્તિઃ સમન્વિતઃ ॥ ૧૯॥

સ્તમ્ભયેદખિલાન્ કામાન્ રાજાનમપિમોહયેત્ ।
પરનિન્દા-પરદ્રોહ-પરવાદ-પરાયણઃ ॥ ૨૦॥

ખલાય પરતન્ત્રાય ભ્રષ્ટાય ચ દુરાત્મને ।
ન દેયં ભક્તિહીનાય શિવદ્રોહકરાય ચ ॥ ૨૧॥

રામભક્તિ વિહીનાય પરદારરતાય ચ ।
જપપૂજાવિહીનાય દ્વિજ-સ્ત્રી-નિન્દકાય ચ ॥ ૨૨॥

ન સ્તવં દર્શયેદ્દિવ્યં દર્શનાચ્છિવહાભવેત્ ।
કુલીનાય સુશીલાય રામભક્તિ પરાય ચ ॥ ૨૩॥

વૈષ્ણવાય વિશુદ્ધાય ભક્તેર્ભક્તાય મન્ત્રિણે ।
દેયં સહસ્રનામેદમશ્વમેધફલં લભેત્ ॥ ૨૪॥

દેવ્યૈ ર્નિવેદિતં યત્-તત્ તસ્યાંશં ભક્ષયેન્નરઃ ।
દિવ્યદેહધરોભૂત્વા દેવ્યાઃ પાર્શ્વચરોભવેત્ ॥ ૨૫॥

નૈવેદ્યનિન્દકં દૃષ્ટ્વા નૃત્યન્તિયોગિનીગણાઃ ।
રક્તપાનોદ્યતાસર્વા માંસાસ્થિચર્મણોદ્યતાઃ ॥ ૨૬॥

તસ્યૈ નિવેદિતં દેવ્યૈ દૃષ્ટ્વા સ્તુત્વા ચ માનવમ્ ।
ન નિન્દેન્મનસાવાચા સર્વવ્યાધિપરાઙ્મુખઃ ॥ ૨૭॥

યસ્યાલયેતિષ્ઠતિનૂનમેતત્ સ્તોત્રં સુરમ્યં લિખિતં વિધિજ્ઞૈઃ ।
ગોરોચનાલઙ્કૃત-કુઙ્કુમાક્તં કર્પૂર-સિન્દૂર-મદદ્રવેન ॥ ૨૮॥

ન તત્ર ચૌરસ્ય ભયં ન શત્રુતો ન વાશને વહ્નિ ન વ્યાધિભીતિઃ ।

ઉત્પાતવાતૈરપિ નાત્રશઙ્કા લક્ષ્મી સ્વયં તત્ર વસેદલોલા ॥ ૨૯॥

ઇતિ શ્રીરુદ્રયામલે ઉમામહેશ્વરસંવાદે સકારાદિ
શ્રીસીતાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by Prabhav Tengse, NA

---

*Sakaradi Shri Sita Sahasranama Stotram*

pdf was typeset on August 6, 2023

Please send corrections to *sanskrit@cheerful.com*